श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

सरलकविराघवाचार्य विरचिता

# ॥ श्रीदक्षिणशेषाचलेश श्रीनिवास भगवत्प्रपत्तिः ॥

## (श्रीप्रसन्नवेङ्कटेश प्रपत्तिः)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीदक्षिणशेषाचलेश श्रीनिवास भगवत्प्रपत्तिः ॥

श्रीनिवासहृदयङ्गमां रमां
सन्नमद्भवखिदापहारिणीम्।
नित्यफुल्लसरसीरुहासनां
सुस्मितां शरणमाश्रयेश्रियम् ॥ 1 ॥

सर्वज्ञ शक्तिभिरुपेत समस्तहेतो
सर्वेश सर्वगुण सर्व हरे दयालो।
लक्ष्मीपते प्रणतवत्सल चक्रपाणे
श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ 2 ॥

वज्रध्वजाङ्कुश सरोरुहशङ्ख चक्रै -
रेखामयैः शुभकरैः परमत्वचिह्नैः।
कान्तैर्विभूषिततलौ तव देवदेव
श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ 3 ॥

अत्यर्थ मार्दवयुतैः करपल्लवैः स्वैः
संवाहने विरचिते कमलाधराभ्याम्।
तज्जक्लमासहनसूचकरक्तवर्णौ
श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ 4 ॥

ब्रह्मेशदेवपतयो नियताधिकाराः
सद्यस्तरन्ति विपदो हि ययोः प्रणामात्।
स्थास्नुं भजन्ति च समीहितसिद्धिमेतौ
श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ 5 ॥

यत्संश्रितप्रिय जनावन नित्यसक्तो
    देव्याश्रिया कनसि दक्षिणशेषशैले।
तौ नित्यमुक्तजनभोग्यतमावुदारौ
    श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ **6** ॥

भावत्कपूजनविधावुपयोगभाजाम्
    उत्तुङ्गसौरभभृतां तुलसीदळानाम्।
स्वच्छन्दकेलिनिलयाविव भासमानौ
    श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ **7** ॥

त्रैलोक्यविक्रमविधिप्रसितौ तदायौ
    इन्द्रं बलिं त्रिभुवनं च कृतार्थयन्तौ।
सर्वेशितुस्तव यशोऽपुषतां भृशं तौ
    श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ **8** ॥

रामात्मनस्तव शिला मिथिलाप्रयाणे
    स्पृष्टा यदीयरजसा किल शापमुक्ता।
जाता हि गौतमवधूर्बत तौ निषेव्यौ
    श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ **9** ॥

तौ दण्डकावननिवासितपोधनानां
    क्षेमानुयोग पदपद्मनिषेवणार्थम्।
प्रत्याश्रमं रधुपते गमने सहायौ
    श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ **10** ॥

हे बालकृष्ण भवतो हननेप्रसक्तं
    दैत्यं विपोथ्य सहसा शकटं बलाढ्यम्।
रक्षाविधेस्तव दिशास्वधिरूढकीर्ती
    श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ **11** ॥

सौलूखलस्य तव दामनि बद्धमुर्तेः
गन्धर्वयुग्मतरुतामपनेतुमिच्छोः।
है बालकृष्ण बतचङ्क्रमणे सखायौ
श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ **12** ॥

है वासुदेव यमुनाह्रदवासिघोर -
दुष्कृत्यकालियफणावलिरङ्गमध्ये।
निश्शङ्कनर्तनकृतो भवतोऽनुकूलौ
श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ **13** ॥

हे कृष्ण पाण्डवसख त्वरयोत्तराया
गर्भं प्रविश्यभसितत्वदशां निरस्य।
सन्तानबीजमवतो भवतः सहायौ
श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ **14** ॥

यौ द्राविडस्य सुकवेः शठकोपसूरेः
जिह्वाग्रपीठमधिगम्य हरे सुहृद्याम्।
गाधामयीमपुषतां भवतः स्तुतिं तौ
श्रीश्रीनिवास चरणौ शरणं प्रपद्ये ॥ **15** ॥

सीताभिराममहनीय महार्हणोत्क
श्रीश्रीनिवासभगवच्चरणप्रपत्तिम्।
श्रीराघवोऽकृत कविः पदवित् स इत्थं
गंभीरभावरुचिरैस्सरलैः स्वपद्यैः ॥ **16** ॥

॥ इति श्रीदक्षिणशेषाचलेश श्रीनिवास भगवत्प्रपत्तिः समाप्ता ॥